শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৩৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৩৫

*শ্রীরামচরিতৱর্ণনম্*

নীতসসুগ্রীৱমৈত্রীং তদনু হনুমতা দুন্দুভেঃ কাযমুচ্চৈঃ
ক্ষিপ্তৱাঙ্গুষ্ঠেন ভূযো লুলুৱিথ যুগপত্ পত্রিণা সপ্ত সালান্।
হত্বা সুগ্রীৱঘাতোদ্যতমতুলবলং বালিনং ৱ্যাজৱৃত্ত্যা
ৱর্ষাৱেলামনৈষীর্ৱিরহতরলিতস্ত্ৱং মতঙ্গাশ্রমান্তে॥ ১॥

সুগ্রীৱেণানুজোক্ত্যা সভযমভিযতা ৱ্যূহিতাং ৱাহিনীং তা-
মৃক্ষাণাং ৱীক্ষ্য দিক্ষু দ্রুতমথ দযিতামার্গণাযাৱনম্রাম্।
সন্দেশং চাঙ্গুলীযং পৱনসুতকরে প্রাদিশো মোদশালী
মার্গে মার্গে মমার্গে কপিভিরপি তদা ত্বত্প্রিযা সপ্রযাসৈঃ॥ ২॥

ত্বদ্বার্তাকর্ণনোদ্যদ্গরুদুরুজৱসমপাতিসম্পাতিৱাক্য-
প্রোত্তীর্ণার্ণোধিরন্তর্নগরি জনকজাং ৱীক্ষ্য দত্বাঙ্গুলীযম্।
প্রক্ষুদ্যোদ্যানমক্ষক্ষপণচণরণঃ সোঢবন্ধো দশাস্যং
দৃষ্ট্ৱা প্লুষ্ট্ৱা চ লঙ্কাং ঝটিতি স হনুমান্ মৌলিরত্নং দদৌ তে॥ ৩॥

ত্বং সুগ্রীৱাঙ্গদাদিপ্রবল কপিচমূচক্রৱিক্রান্তভূমি-
চক্রোভিক্রম্য পারেজলধি নিশিচরেন্দ্রানুজাশ্রীযমাণঃ।
ততপ্রোক্তাং শত্রুৱার্তাং রহসি নিশমযন্ প্রার্থনাপার্থ্যরোষ-
প্রাস্তাগ্নেযাস্ত্রতেজস্ত্রসদুদধিগিরা লব্ধৱান্ মধ্যমার্গম্॥ ৪॥

কীশৈরাশান্তরোপাহৃত গিরিনিকরৈঃ সেতুমাধাপ্য যাতো
যাতূন্যামর্দ্য দংষ্ট্রানখশিখরিশিলাসালশস্ত্রৈঃ স্বসৈন্যৈঃ।
ৱ্যাকুর্ৱন্ সানুজস্ত্ৱং সমরভুৱি পরং ৱিক্রমং শক্রজেত্রা
ৱেগান্নাগাস্ত্রবদ্ধঃ পতগপতিগরুন্মারুতৈর্মোচিতোভূঃ॥ ৫॥

www.prapatti.com

সৌমিত্ৰিস্তত্ৰ শক্তিপ্ৰহৃতিগলদসুৰ্বাতজানীতশৈল-
ঘ্ৰাণাত্ প্ৰাণানুপেতো ব্যকৃণুত কুসৃতিশ্লাঘিনং মেঘনাদম্।
মাযাক্ষোভেষু বৈভীষণৱচনহৃতস্তম্ভনঃ কুম্ভকৰ্ণং
সম্প্ৰাপ্তং কম্পিতোৰ্ৱীতলমখিলচমূভক্ষিণং ব্যক্ষিণোস্তৱম্॥ ৬ ॥

গৃহ্নন্ জম্ভারিসম্প্ৰেষিতরথকৱচৌ রাৱণেনাভিযুদ্ধ্যন
ব্ৰহ্মাস্ত্ৰেণাস্য ভিন্দন্ গলততিমবলামগ্নিশুদ্ধাং প্ৰগৃহ্নন্।
দেৱশ্ৰেণীৱরোজ্জীৱিতসমরমৃতৈরক্ষতৈৰৃক্ষসঙ্ঘৈ-
ৰ্লঙ্কাভৰ্ত্ৰা চ সাকং নিজনগরমগাঃ সপ্ৰিযঃ পুষ্পকেণ॥ ৭ ॥

প্ৰীতো দিব্যাভিষেকৈরযুতসমধিকান্ ৱতসরান্ পৰ্যরংসী-
ৰ্মৈথিল্যাং পাপৱাচা শিৱ! শিৱ! কিল তাং গৰ্ভিণীমভ্যহাসীঃ।
শত্ৰুঘ্নেনাৰ্দযিত্বা লৱণনিশিচরং প্ৰাৰ্দযঃ শূদ্ৰপাশং
তাৱদ্বাল্মীকিগেহে কৃতৱসতিরুপাসূত সীতা সুতৌ তে॥ ৮ ॥

ৱাল্মীকেস্তৱতসুতোদ্গাপিতমধুরকৃতেরাজ্ঞযা যজ্ঞৱাটে
সীতাং ত্বয্যাপ্তুকামে ক্ষিতিমৱিশদসৌ ত্বং চ কালাৰ্থিতোভূঃ।
হেতোঃ সৌমিত্ৰিঘাতী স্বযমথ সরযূমগ্ননিশশেষভৃত্যৈঃ
সাকং নাকং প্ৰযাতো নিজপদমগমো দেৱ ৱৈকুণ্ঠমাদ্যম্॥ ৯ ॥

সোযং মৰ্ত্যাৱতারস্তৱ খলু নিযতং মৰ্ত্যশিক্ষাৰ্থমেৱং
ৱিশ্লেষাৰ্তিৰ্নিরাগস্ত্যজনমপি ভৱেত্ কামধৰ্মাতিসক্ত্যা।
নো চেত্ স্বাত্মানুভূতেঃ ক্ব নু তৱ মনসো ৱিক্ৰিযা চক্ৰপাণে
স ত্বং সত্ত্বৈকমূৰ্তে পৱনপুরপতে ৱ্যাধুনু ৱ্যাধিতাপান্॥ ১০ ॥

**********